रसोनस्वरसे सर्पिः पञ्चमूलरसान्वितम् ।
सुरारनालदध्यम्ल-मूलकस्वरसैः सह ॥
व्योष-दाड़िमवृक्षाम्लयवानीचव्यसैन्धवैः ।
हिङ्ग्वम्लवेतसाजाजीदीप्यकैश्च समांशिकैः ॥
सिद्धं गुल्मग्रहण्यर्शःश्वासोन्मादक्षयज्वरान् ।
कासापस्मारमन्दाग्नि-प्लीहशूलानिलान् जयेत् ॥
तृणमूलकषाये तु जीवनीयैः पचेद्‌घृतम् ।
न्यग्रोधादिगणे वापि गणे वाप्युत्पलादिके ॥
रक्तपित्तोत्थितं घ्नन्ति घृतान्येतान्यसंशयम् ।
आरग्वधादौ विपचेद्दीपनीययुतं घृतम् ॥
क्षारवर्गे पचेच्चान्यत् पचेन्मूत्रगणेऽपरम् ।
घ्नन्ति गुल्मं कफोद्भूतं घृतान्येतान्यसंशयम् ॥
यथा दोषोच्छ्रयच्चापि चिकित्सेत् सान्निपातिकम् ।
चूर्णं हिङ्ग्वादिकं वापि घृतं वा शोधनाशनम् ॥
पिबेद्‌गुल्मापहं काले सर्पिस्त्रैवृतमेव वा ।
तिलेक्षुरकपालाशसार्षपं यवनालजम् ॥
भस्म मूलकजञ्चापि गोजाविखरहस्तिनाम् ।
मूत्रेण महिषीणाञ्च गालिकेच्चावचूर्णितैः ॥
कुष्ठ-सैन्धवयष्ट्याह्व-नागरक्रिमिघातिभिः ।
साजमोदैश्च दशभिः सासुदार्व्व पलैर्युतम् ॥
अयःपात्रेऽग्निनाल्पेन पक्त्वा लेह्यमथोद्धरेत् ।
तस्य मात्रां पिबेद्धिमा सुरया सर्पिषापि वा ॥
धान्याम्लेनोष्णतोयेन कौलत्थेन रसेन वा ।
गुल्मं वातविकारांश्च क्षारोऽयं हन्त्यसंशयम् ॥”
“पीतं सुखाम्बुना वापि स्वर्ज्जिका कुष्ठसैन्धवम् ।
वृश्चीकस्तरबूकश्च वर्षाभूर्हस्तीशयम् ।
चित्रकश्च जलद्रोणे पक्त्वा पादावशेषितम् ॥
मागधी चित्रकक्षौद्रलिप्ते कुम्भे निधापयेत् ।
मधुनः प्रस्थमावाप्य पथ्याचूर्णार्द्धसंयुतम् ॥
तुषोषितं दशाहन्तु जीर्णभक्तः पिबन्नरः ।
अरिष्टोऽयं जयेद्‌गुल्ममविपाकमरोचकम् ॥
सशूले सोन्नतस्पन्दे दाहपाकरुगन्विते ।
गुल्मे रक्तं जलौकोभिः शिरामोक्षेण वा हरेत् ॥
सुखोष्णा जाङ्गलरसाः सुस्निग्धा व्यक्तसैन्धवाः ।
कटुत्रिकसमायुक्ता हिताः पाने च गुल्मिनाम् ॥
पेया वातहरैः सिद्धाः कौलत्थाः संस्कृता रसाः ।
खलाः सपञ्चमूलाश्च गुल्मिनां भोजने हिताः ॥
बद्धवर्च्चोऽनिलानान्तु सार्द्रकं क्षीरमिष्यते ।
कुम्भीपिण्डेष्टकास्वेदान् कारयेत् कुशलो भिषक् ॥
गुल्मिनः सर्व्व एवोक्ता दुर्व्विरेच्यतमा भृशम् ।
अतश्चैतांस्तु सुस्निग्धान् स्वेदनेनोपपादयेत् ॥
विलेपनाभ्यञ्जनानि तथा सन्दहनानि च ।
उपनाहाश्च कर्त्तव्याः सुखोष्णाः साल्वणादयः ।
उदरोक्तानि सर्पींषि चूर्णवर्त्तिक्रियास्तथा ॥
लवणानि च योग्यानि यान्युक्तान्युदरामये ।
वातवर्च्चोनिरोधे तु साम्लद्राक्षकसर्षपैः ॥
कृत्वा पायौ विधातव्या वर्त्तयो मरिचोत्तराः ।
दन्ती चित्रकमूलेषु तथा वातहरेषु च ॥
कुर्य्यादरिष्टान् सर्व्वांश्च सूत्रस्थाने यथेरितान् ।
खादेद्वाप्यगुरान् भृष्टान् पूतिकञ्चपटोलजान् ॥
ऊर्द्ध्ववातमशुद्धञ्च गुल्मिनं न निरूहयेत् ।
पिबेत्त्रिवृन्नागरं वा सगुड़ां वा हरीतकीम् ॥
गुग्गुलुं त्रिवृतां दन्तीं द्रवन्तीं सैन्धवं वचाम् ।
मूत्रमद्य-पयोद्राक्षा-रसैर्वीक्ष्य बलाबलम् ॥
एवं पीलूनि पिष्टानि पिबेत् सलवणानि तु ।
पिप्पलीपिप्पलीमूलचव्यचित्रकसैन्धवैः ॥
युक्ता हन्ति सुरागुल्मं शीघ्रं काले प्रयोजिता ।
बद्धविण्मारुतो गुल्मी भुञ्जीत पयसा यवान् ॥
कुल्माषान् वा बहुस्नेहान् भक्षयेल्लवणोत्तरान् ॥”
इत्युत्तरतन्त्रे द्वाचत्वारिंशत्तमेऽध्याये सुश्रुतेनोक्तम् ॥) सेनासंख्याविशेषः । (यथा, महाभारते । १।२।१९-२० ।
“एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥
पत्तिन्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥”)
अस्यार्थविवृतिर्यथा,—
अत्र गजा नव, रथा नव, अश्वाः सप्तविंशतिः पदातयः पञ्चचत्वारिंशत्, समुदायेन नवतिः ॥ शीह । अप्रकाण्डश्च । तत्पर्य्यायः । स्तम्बः २ इत्यमरः । २ । ४ । ६ ॥ “अविद्यमानप्रकाण्डस्तनुप्रकाण्डो वा बहुपत्रवान् मल्लीझिण्टीनलकमलवंशवीरणादिः मूलादारभ्य पूर्व्वभागः प्रकाण्डः ।” इति भरतः ॥ (यथा, मनुः । १।४८ ।
“गुच्छगुल्मन्तु विविधं तथैव तृणजातयः ।”
“यत्र लतासमूहा भवन्ति न च प्रकाण्डानि ते गुच्छा मल्लिकादयः, गुल्मा एकमूलाः सङ्घातजाताः ।” इति टीकायां कुल्लूकभट्टः ॥ ) घट्टभेदः । सैन्यरक्षणम् । इति मेदिनी । मे । ११ ॥ (रक्षिपुरुषसमूहः । यथा, मनुः । ७ । ११४ ।
“द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितम् ।”
गुल्मं रक्षिपुरुषसमूहमित्यस्य टीकायां कुल्लूकभट्टः ॥ सैन्यैकदेशः । यथा, तत्रैव । ७ । १९० ।
“गुल्मांश्च स्थापयेदाप्तान् कृतसंज्ञान् समन्ततः ।”
गुल्मान् सैन्यैकदेशानिति टीकायां कुल्लूकभट्टः ॥)

गुल्मकेतुः, पुं, ( गुल्मानां केतुर्ध्वज इव । गुल्मः केतुर्यस्येति वा । अत्र तु केतुर्लिङ्गं ज्ञापकमित्यर्थः । ) अम्लवेतसः । इति राजनिर्घण्टः ॥

गुल्ममूलं, क्ली, ( गुल्मवन्मूलमस्य । ) आर्द्रकम् । इति राजनिर्घण्टः ॥

गुल्मवल्ली, स्त्री, (गुल्माढ्या वल्ली यस्याः ।) सोमलता । इति राजनिर्घण्टः ॥ ( सोमलताशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

गुल्ममूलः, पुं, (गुल्मात्मकं गुल्मान्तकं वा मूलमस्य । ) रोगविशेषः । तस्यौषधं यथा,—
“नारी पुष्पदिने पीत्वा गोक्षीरेणोपवासतः ।
श्वेतार्कस्य तु वै मूलं तस्यास्तद्‌गुल्ममूलनुत् ॥”
इति गारुडे १९२ अध्यायः ॥

गुल्मिनी, स्त्री, (गुल्मोऽस्त्यस्या इति । “अत इनिठनौ ।” ५ । २ । ११५ । इति इनिः । ततः ङीप् ।) विस्तृता लता । तत्पर्य्यायः । वीरुत् २ उलुपः ३ । इत्यमरः । २ । ४ । ९ ॥ वीरुधा ४ अवरुत् ५ । इति शब्दरत्नावली ॥

गुल्मी, स्त्री, (गुल्माकारो विद्यतेऽस्या इति । “अर्श आदिभ्योऽच् ।” ५ । २ । १२७ । इत्यच् ततो ङीष् ।) आमलकी । एला । वनी । वस्त्रवेश्म । इति मेदिनीशब्दरत्नावल्यौ हेमचन्द्रश्च ॥ गृध्रनखीवृक्षः । इति शब्दचन्द्रिका ॥ गुड़कांश्रोली इति भाषा ॥ (गुल्मः गुल्मनामको रोगोऽस्त्यस्य इति । गुल्म + इनिः । ) गुल्मरोगयुक्ते त्रि ॥ (यथा, अत्रैव वृतपनसशब्दगुणव्याख्याने भावप्रकाशः ।
“विशेषात् पनसं वर्ज्ज्यं गुल्मिभिर्मन्दवह्निभिः ॥)

गुल्यः, पुं, ( गुड़मिव माधुर्य्यमर्हतीति । गुड़ + यत् । ततो ड़स्य लत्वम् । ) मधुरः । स्वादुः । इति हेमचन्द्रः । ६ । २४ ॥

गुवाकः, पुं, ( गुवति मलवत् कायस्तुच्छजतीति । गु + “पिणाकादयश्च ।” उणां । ४ । १५ । इति आकः । तुदादित्वाद्‌गुणाभावः । निपातनात् दीर्घोऽपि दृश्यते ।) वृक्षविशेषः । गुया सुपारि इति च भाषा ॥ तत्पर्य्यायः । घोण्टा २ पूगः ३ क्रमुकः ४ खपुरः ५ । इत्यमरः । २।४।१६९ ॥ गूवाकः ६ । इति तट्टीका ॥ पूगवृक्षः ७ दीर्घपादपः ८ वल्कतरुः ९ दृढ़वल्क १० चिक्कणः ११ । इति राजनिर्घण्टः ॥ पूगी १२ । इति भावप्रकाशः ॥ सुरञ्जनः १३ गोपदलः १४ राजतालः १५ छटाफलः १६ । इति त्रिकाण्डशेषः ॥*॥ अस्य फलस्य पर्य्यायः । क्रमुकफलम् १ पूगम् २ चिक्कणी ३ चिक्का ४ चिक्कणम् ५ श्लक्ष्णकम् ६ उद्वेगम् ७ पूगफलम् ८ । इति राजनिर्घण्टः ॥ पूगीफलम् ९ । इति भावप्रकाशः ॥*॥ अस्य मस्तिष्कस्य गुणाः । स्वादुत्वम् । तिक्तत्वम् । कषायत्वम् । बलप्राणशुक्रवृद्धिभेदमदकारित्वम् । मूत्ररोगनाशित्वञ्च । इति राजवल्लभः ॥ * ॥ अस्य निर्य्यासस्य गुणाः । हिमत्वम् । मोहनत्वम् । गुरुत्वम् । विपाके उष्णत्वम् । क्षारत्वम् । वाम्यत्वम् । वातघ्नत्वम् । पिच्छलत्वञ्च ॥*॥ अस्य फलगुणाः सम्मोहकारित्वम् । कषायत्वम् । स्वादुत्वम् । रेचनत्वम् । त्रिदोषशमनत्वम् । रुच्यत्वम् । वक्त्रक्लेदमलापहत्वञ्च । इति राजनिर्घण्टः ॥ गुरुत्वम् । रूक्षत्वम् । कफपित्तकारित्वम् । दीपनत्वञ्च ॥ * ॥ आर्द्रस्य तस्य गुणाः । गुरुत्वम् । अभिष्यन्दित्वम् । अग्निदृष्टिहरत्वञ्च ॥ * ॥ स्विन्नस्य तस्य गुणः । दोषत्रयच्छेदित्वम् । दृढ़मध्यं तदुत्तमम् । इति भावप्रकाशः ॥*॥ आमपूगस्य गुणाः । कषायत्वम् । सुखमलरक्तामश्लेष्मपित्तोदराध्माननाशित्वम् । कण्ठशुद्धिकारित्वम् । सारकत्वञ्च ॥ * ॥ शुष्कस्य तस्य गुणाः । कफाध्मानघ्नत्वम् । रुचिकरत्वम् । पाचनत्वम् । रेचनत्वञ्च ॥ * ॥ तत् ताम्बूलेनोनमयुतञ्चेत् झटिति पाण्डुवातशोषकारित्वञ्च । इति राजनिर्घण्टः ॥*॥ तत्पीतगुणाः । तस्यादिपीतं विषतुल्यम् । द्वितीयपीतं भेदकं दुर्जरञ्च । तृतीयपीतं पानोपयुक्तं सुधातुल्यं रसायनञ्च । इति राजवल्लभः ॥ ( ताम्बूलेन विना केवलं गुवाकभक्षणाकाङ्क्षा-